(मित्रयुवंशोद्भवादौ च। यथा, हरिवंशे। ३२। ७७—७८।
"अत ऊर्द्ध्वं प्रवक्ष्यामि दिवोदासस्य सन्ततिम्।
दिवोदासस्य दायादो ब्रह्मर्षिर्मित्रयुर्नृपः।
मैत्रायणी ततः शाखा मैत्रेयास्तु ततः स्मृताः॥")

मैत्रेयिका, स्त्री, मित्रयुद्धम्। इति त्रिकाण्डशेषः॥ (मित्रयूनां भावः कर्म्म वा। मित्रयु+"गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु।" ५।१।१३४। इति वुञ्। ततः "केकयमित्रयुप्रलयानां यादेरियः।" ७। ३। २। इति इयादेशः। यथा, "मैत्रेयिकया श्लाघते।" इति काशिका। ७। ३। २।)

मैत्रं, क्ली, स्त्री, (मित्र+अण्।) मित्रस्य भावः। मित्रस्य कर्म्म। इत्यमरभरतौ। ३। ५। ३६। (यथा, पञ्चतन्त्रे। ३। ७०।
"प्राहुः साप्तपदं मैत्रं जनाः शास्त्रविचक्षणाः।
मित्रताञ्च पुरस्कृत्य किञ्चिद्वक्ष्यामि तच्छृणु॥")

मैथिली, स्त्री, (मिथिला निवासोऽस्येति। मिथिला+"सोऽस्य निवासः।" ४। ३। ८९। इति अण्। मैथिलस्तन्नामा राजा तस्यापत्यं स्त्री। मैथिल+इञ्। ङीष्।) सीता। इति हेमचन्द्रः॥ (यथा, भट्टिकाव्ये। २। ४७।
"हिरण्मयी शाललतेव जङ्गमा
च्युता दिवः स्थास्नुरिवाचिरप्रभा।
शशाङ्ककान्तेरधिदेवताकृतिः
सुता ददे तस्य सुताय मैथिली॥"
मिथिलापतिमात्रे, पुं। यथा, महाभारते। १२। ९९। ३।
"जनको मैथिलो राजा महात्मा सर्व्वतत्त्ववित्।
योधान् स्वान् दर्शयामास स्वर्गं नरकमेव च॥")

मैथुनं, क्ली, (मिथुने सम्भवतीति। मिथुन+"संभूते।" ४।३।४१। इति अण्। मिथुनस्येदमिति अण् वा।) अग्न्याधानम्। यथा, मनुशातातपौ।
"असपिण्डा च या मातुरसगोत्रा च या पितुः।
सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने॥
मैथुने मिथुनशब्दवाच्ये स्त्रीपुंससाध्ये अग्न्याधानपुत्त्रोत्पत्त्यादौ।" इत्युद्वाहतत्त्वम्॥*॥ सङ्गतम्। रतम्। इत्यमरः।३।३।१२१॥ "सङ्गतिः सङ्गमो दारसंयोगः विवाह इति कश्चित्॥ रतं सुरतम्। अनयोर्मैथुनम्। मिथुनात् सङ्गमे इदमर्थे स्वार्थे रतौ निष्पाद्यार्थे वा अणः। सम्बन्धे सुरते युग्मे राशौ मिथुनमिष्यते। इति वाड़िः।" इति कृट्टीकायां भरतः॥*॥ शेषस्य पर्य्यायः। सुरतम् २ अभिमानितम् ३ धर्षितम् ४ संप्रयोगः ५ अनारतम् ६ अग्र्यसग्र्यकम् ७ उपहरम् ८ त्रिभद्रम् ९ क्रीड़ारत्नम् १० महासुखम् ११। इति त्रिकाण्डशेषः॥ व्यवायः १२ ग्राम्यधर्म्मः १३ रतम् १४ निधुवनम् १५। इत्यमरः। २। ७। ५७॥ अस्य गुणाः। धातुक्षयकारित्वम्। रतिसन्तानदार्ढ्यत्वञ्च। अतिशयमैथुनस्य श्वासकासज्वरकारित्वम्। अमैथुनस्य प्रमेहमेदग्रन्थिरोगाग्निमान्द्यकारित्वम्। स्त्रीसंसर्गरहितस्य आयुर्जराशरीरबलवर्णस्थिरोपचितमांसानि भवन्ति। पूज्यस्थानाशुचिस्थानसेकस्थानलोकसमीपप्रातःकालसन्ध्याकालपर्व्वकालेषु तस्य त्याज्यत्वम्। एतत्कर्म्मणि रजस्वलाकामा मलिना वन्ध्या वर्णज्येष्ठा वयोज्येष्ठा व्याधियुक्ताङ्गहीनासती वेश्या योनिदोषयुक्ता सगोत्रा गुरुपत्नी भिक्षुकी कपटव्रतधारिणी दृष्टा च त्याज्या। रजस्वलागमने दृष्ट्यायुस्तेजःक्षयोऽधर्म्मश्च भवति। कपटव्रतयुक्तागुरुपत्नी सगोत्रादृष्टागमने एवं पर्व्वकाले सन्ध्याकाले च स्त्रीमैथुने पापमायुःक्षयश्च भवति। वयोरूपगुणोपेतां कुलशीलसमन्विताम्। अधिकामां स्वष्टामलङ्कृतां वाजीकरणपीड़िताञ्च प्रमदां हृष्टोऽधिकामश्च पुरुषः सेवेत। शुक्रवर्द्धकद्रव्यं सशर्करं शीतलजलं वा पीत्वा कामबाणचञ्चलां सुरूपामनिन्द्यां हृष्टां प्रमदामाद्यप्रहरे हृष्टः कामुको गत्वा तदनु सुखं स्वपेत्। असकृद्गमने तु नरो धातुवैषम्यमेति। रतान्ते स्नानं सशर्करक्षीरपानं निद्रा गौड़िकरसभोजनञ्च हितम्। इति राजवल्लभः॥*॥ ("तत्र प्रथमे दिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसां भवति। यश्च तत्राधीयते गर्भः स प्रसवमानो विमुच्यते। द्वितीयेऽप्येवं सूतिकागृहे वा। तृतीयेऽप्येवमसम्पूर्णाङ्गोऽल्पायुर्वा भवति। न च प्रवर्त्तमाने रक्ते बीजं प्रविष्टं गुणकरं भवति यथा नद्यां प्रतिस्रोतः प्लाविद्रव्यं प्रक्षिप्तं प्रतिनिवर्त्तते नोर्द्ध्वं गच्छति तद्वदेव द्रष्टव्यम्। तस्मान्नियमवतीं त्रिरात्रं परिहरेत्। अतःपरं मासादुपेयात्।"
"ऋतुस्नाता तु या नारी स्वप्ने मैथुनमावहेत्।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि॥
मासि मासि विवर्द्धेत गर्भिण्या गर्भलक्षणम्।
कललं जायते तस्या वर्ज्जितं पैतृकैर्गुणैः॥"
इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये॥)
व्रतदिवसे अष्टाङ्गमैथुनस्य त्याज्यत्वं यथा,—
"स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च।
मैथुनं विविधं त्याज्यं व्रते क्रीड़ाविरहये॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४ अध्यायः॥
अस्य विधिनिषेधौ यथा,—
"ऋतावुपगमः शस्तः स्वपत्न्यामवनीपते!।
पुन्नामर्क्षे शुभे काले ज्येष्ठयुग्मासु रात्रिषु॥
नास्नातां तु स्त्रियं गच्छेन्नातुरां न रजस्वलाम्।
नानिष्टां न प्रकुपितां नाप्रशस्तां न गुर्व्विणीम्॥
नादक्षिणां नान्यकामां नाकामां नान्ययोषितम्।
क्षुत्क्षामामतिभुक्तां वा स्वयं चैभिर्गुणैर्युतः॥
स्नातः स्रग्गन्धधृक् प्रीतो नाध्मातः क्षुधितोऽपि वा।
सकामः सानुरागश्च व्यवायं पुरुषो व्रजेत्॥
चतुर्दश्यष्टमी चैव अमावास्याथ पूर्णिमा।
पर्व्वाण्येतानि राजेन्द्र! रविसंक्रान्तिरेव च॥
तैलस्त्रीमांससंभोगी पर्व्वस्वेतेषु वै पुमान्।
विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः॥
अशेषपर्व्वस्वेतेषु तस्मात् संयमिभिर्बुधैः।
भाव्यं सच्छास्त्रदेवेज्याध्यानजप्यपरैर्नरैः॥
नान्ययोनावयोनौ वा नोपयुक्तौषधस्तथा।
देवद्विजगुरूणाञ्च व्यवायी नाश्रयी भवेत्॥
चैत्यचत्वरतीर्थेषु नैव गोष्ठे चतुष्पथे।
नैव श्मशानोपवने सलिलेषु महीपते!॥
प्रोक्तपर्व्वस्वशेषेषु नैव भूपाल! सन्ध्ययोः।
गच्छेद्व्यवायं मतिमान्न मूत्रोच्चारपीड़ितः॥
पर्व्वस्वभिगमोऽधन्यो दिवा पापप्रदो नृप!।
भुवि रोगावहो नृणामप्रशस्तो जलाशये॥
परदारान्न गच्छेत मनसापि कदाचन।
किमु वाचास्थिबन्धोऽपि नास्ति तेषु व्यवायिनाम्॥
मृतो नरकमभ्येति हीयतेऽत्रापि चायुषः।
परदाररतिः पुंसामुभयत्रापि भीतिदा॥
इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत्।
यथोक्तदोषहीनेषु सकामेष्वनृतावपि॥"
इति विष्णुपुराणे। ३। ११। १११-१२४॥*॥
परस्त्र्यादिगमने दण्डो यथा,—
"ब्राह्मणः क्षत्त्रियो वैश्यः क्षत्रविट्शूद्रयोषितः।
व्रजन्दाप्यो भवेद्राज्ञा दण्डं उत्तमसाहसम्॥
वैश्यागमे च विप्रस्य क्षत्त्रियस्यान्त्यजागमे।
मध्यमं प्रथमं वैश्यो दण्ड्यः शूद्रागमाद्भवेत्॥
शूद्रः सवर्णागमने शतं दण्ड्यो महीभुजा।
वैश्यश्च द्विगुणं राजन्! क्षत्त्रियस्त्रिगुणं तथा॥
ब्राह्मणश्च भवेद्दण्ड्यस्तथा राजंश्चतुर्गुणम्।
अगुप्तासु भवेद्दण्डः सगुप्तास्वधिको भवेत्॥
माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी तथा॥
भागिनेयी तथा चैव राजपत्नी तथैव च।
तथा प्रव्रजिता नारी वर्णोत्कृष्टा तथैव च॥
इत्यगम्यास्तु निर्द्दिष्टास्तासान्तु गमने नरः।
शिश्नस्योत्कर्त्तनं कृत्वा ततस्तु वधमर्हति॥
भ्रातृभार्य्यागमे पूर्व्वाद्दण्डस्तु द्विगुणो भवेत्।
चाण्डालीञ्च श्वपाकीं वा गच्छन् वधमवाप्नुयात्॥
तिर्य्यग्योनौ च गोवर्ज्यं मैथुनं योऽभिसेवते।
स पणं प्राप्नुयाद्दण्डं तस्याश्च यवसोदकम्॥
सुवर्णञ्च भवेद्दण्ड्यो गां व्रजन् मनुजोत्तम!।
वैश्यागामी द्विजो दण्ड्यो वैश्याशुल्कसमं पणम्॥
गृहीत्वा वेतनं वेश्या लोभादन्यत्र गच्छति।
वेतनं द्विगुणं दद्याद्दण्डञ्च द्विगुणन्तथा॥
अन्यमुद्दिश्य यो दद्यात् नयेदन्यस्य कारणात्।
तस्य दण्डं भवेद्राजन्! सुवर्णस्य च माषकम्॥
नीत्वा भोगान्न यो दद्याद्दाप्यो द्विगुणवेतनम्।
राज्ञश्च द्विगुणं दण्डस्तथा धर्म्मो न हीयते॥
बहूनां व्रजतामेकां सर्व्वे ते द्विगुणं दमम्।
दद्युः पृथक् पृथक् सर्व्वे दण्डञ्च द्विगुणं परम्॥"
इति मात्स्ये २०१ अध्यायः॥

मैनाकः, पुं, (मेनकाया अपत्यं पुमान्। मेनकायां भव इति वा। मेनका+अण्। पृषोदरादित्वात्